This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥अथघटखर्परकाव्य
॥१॥ लिख्यते॥ प्रोषितप्रमदयेदमुच्यतेऽतिषण्ढ्लोकेनाल्पयः॥प्रो
षितप्रमदयाविदेशागतभर्त्तृकयासख्याइदंनिश्चितमित्यादि
वक्ष्यमाणंउच्यते॥हेसखिकिंदाडिमकुंदसमानदंति।कुंदपुष्प
वत्समानाःदंताःयस्याःसासंबोधनं।निश्चितंव्यालं अशिनं

॥श्रीगणपतिर्जयति॥ निश्चितंखमुपेत्यनीरदैः श्रियहीना॥
॥हृदयावनीरदैः॥सलिलैर्निहितंरजःक्षितोरविचंद्रावपि॥
॥नोपलक्षितौ॥१॥

खमाकाशं।कैःनीरदैः किंभूतैःनीरदैःश्रीयहीनाहृदयावनीरदैः ॥१॥
प्रियेणवल्लभेनहीनारहितायस्याः।हृदयंचित्तंतदेवभवनी भूमी
तांरदंतिविदारयंति॥तासांमनोदाहकैरित्यर्थः॥किंरूपानिश्चितं

Acc. No. ~~3165~~ M-1617
Title - घटखर्परकाव्यम् सटीक.
Author - टी. :- ?
Date - ?
Sub - काव्य
folio - 10
Xerox - 18

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1617
Dist. Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपेत्य आगत्य तथा सलिलैर्जलैः निहितं स्थापितं। किंतत् रजोधु
लिः कस्यांक्षितौ भ्रमौ तथा रविचंद्रावपि नोपलक्षितौ॥ सूर्यम्र
गांकौ मेघैराछादितानिष्टतौ॥ ४॥ हंसानदंतिगांगा॥ कुंद
दसमानदंति॥ तथाहंसाः चक्रवाकाः। द्रवंतिगछंतिकस्मान्नद त्

॥ हंसानदन्मेघभयाद्रवंतिनिशामुखान्यघनचंद्रवंति॥
॥ नवांबुमत्ताः शिखिनो नदंतिमेघागमेकुंदसमानदंति॥३॥

न्मेघभयात्गर्जनघनसाध्वसात् अद्याधुनानिशामुखानिन
चंद्रवंतिशाशियुक्तानि। तथाशिखिनोमयूराः नदंतिशब्दाय
ति॥ कथंभूताः नवांबुमताः नूतनजलेनमत्ताः हृष्टाः एतत्सर्वक
स्मिन्काले मेघागमे मेघनामागमेतस्मिन्वर्षाकाले कुंदसमान
दंति व्याख्यातमेतत् चक्राकार्मनसौकइत्यमरः॥ २॥ श्रीसांब॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेघाच्छन्निति॥ ॥हैसखिनतथारात्रौनभःनभातिनद्योभते॥नि
द्यानिद्यातिथिर्निशात्रिस्त्रीत्यमरः॥किंतंनभः॥आकाशंवितारंविगत
स्तारकायस्मात्तत्रनिद्राचपश्चाद्भ्युपैतिप्राप्नोति।किंहरिंकिंविष्णुं
कीदृशंसुखसेवितारंसुखंद्योवतेअनुभवतियःसुखसेविता
तंअथवानिद्राकथंभूता।सुखसेवितासुखेनसेव्यसेविताश्रितारंअरं
॥मेघाच्छन्नंनिद्रानभातिनभोवितारंनिद्राभ्युपैतिचहरिंसुख॥
॥वितारं॥सेंद्रायुधश्यजलदोद्यरसंनिभानांसंरंभमावहति॥
॥भूधरसंनिभानां॥३॥
शीघ्रंअभ्युपैति।तथाजलदोमेघाःसंरंभंआटोपोयंआवहतिद्यधुना अ
जलंददातीतिजलदः।कथंभूताःसेंद्रायुधः।सहइंद्रचापेणवर्त्ततेइंद्र ॥२॥
चापसहितः।किंकुर्वंसन्गर्जन्संन्।इभानांगजानां।कथंभूतानां
भूधरसंनिभानांगिरितुल्यानां।नभोंतरिक्षंगगनमित्यमरः॥विष्णु
र्नारायणोहरीतिहलायुधः॥लक्ष्मीक्षिप्रमरंद्रुतमित्यमरः॥इंद्रायुधंवाक्रेधनु
॥रित्यमरः॥एतत्सर्वंप्रोषितप्रमदयेसूच्यते॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतडिदिति॥ ॥निपतंतिकिंजलंकेषुपर्वतेषुकीदृशंजलंसतडिज्ज
लदार्पितंसहतडिदावर्त्ततेसतडित्सचासौजलदःतेनअर्पितं।की
दृशेषुनगेषुस्वनंतश्चतेअतोभोधरास्तेभ्योभीताःपक्ष्यानगच्छंतीतिप
न्नगाःयेषुते।कीदृशंपरिधीरवंपरिसमंतात्धीरोगंभीरोरवोयस्यतत्।
कासुंदरीषुउहासु।कथंभूतासुअत्यद्भुतसुंदरीषुअत्यद्भूतरूपाःसुंदर्योयासु
॥सतडिज्जलदार्पितंनगेषुस्वनंतंभोधरभीतपंन्नगेषु॥परिधीरवं॥
॥जलंदरीषुनिपत्यैतेद्भूतरूपसुंदरीषु॥४॥क्षिप्रंप्रसादयतिसंप्रति॥
॥कोपितानिकांतामुखानिरतिविग्रहकोपितानि॥उत्कंठयंतिपथिका॥
॥न्जलदाःस्वनंतःशोकःसमुद्वहतितद्वनितास्वनंतः॥५॥
ताःतासु॥४॥क्षिप्रमिति॥ ॥कोपिशब्दःसंभावनेकोपिपुरुषःतानिकांता
मुखानि भार्यावदनानिक्षिप्रंसंप्रतिअधुनाप्रसादयतितोषयति।अवर्जय
तीतियावत्।यानिरतिविग्रहकोपितानिजलदाःस्वनंतःपथिकान्उत्क
उयंति।तद्वनितासुपथिकवधुषुअनंतोअपरिमाणःशोकोवियोगदुःखंसमु
॥द्वहतिविबाध्यते॥शोषितप्रमदयेदमुच्यते॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छादितेति॥ ॥प्रोषितप्रमदयाविदेशागतभर्त्तृकयाइदमुच्यते॥
दिनकरस्यरश्मिसम्मूहेछादितेपिहितेसतिनकेवलं भावनेछा
दितेसति।किंतुआकाशाज्जलेपततिसतिकिंविशिष्टेशोकभा

॥ छादितेदिनकरस्य भावनेस्वाज्जलेपततिशोकभावने॥
॥ मन्मथेचहृदिहंतुमुद्यतेप्रोषितप्रमदयेदमुच्यते॥ ६॥

वनेशोकोविरहः। तेदुःखं भावयतिप्रतिपादयति। शोकभा
वनः तस्मिन्केवलजलेपतति।मन्मथेचहृदि आधारेहंतुंमा
रयतुं व्यवसितेसति॥ ६॥श्रीरामचंद्रायनमः॥ ॥

॥२॥

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वकालमित्त॥ ॥अहोतोयदाःहेमेघाः। यूयंआगतास्थय
दा।अस्मिन्कालेदयितःवल्लभोगतःविदेशस्थंकिंकृत्वा।आग
तस्यसर्वकालमवलंब्यअतिक्रम्य।अतिवात्यलइतिकृंमांमा

॥सर्वकालमवलंब्यतोयदाआगतास्थदयितोगतोयदा॥
॥निर्घृणेनपरदेशसेविनामारयिष्यथहतेनमांविना॥७॥

रयिष्यथविनाशयिष्यथ।कथंविनाकेनम्रियतमेनकिंभूतेन
निर्घृणेननिर्गताघृणाकारुण्यंयस्यसनिर्घृणस्तेनपुनरपिकि
दृशेन।परदेशसेविनापरदेशांसेवितुंशीलंस्वभावोयस्यप
रदेशसेवितेनपरदेशसेविना॥७॥श्रीसांबसदाशिवाय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥

ब्रूतमिति॥ ॥हेघनाःहेमेघाः तंपथिकंयूयंमेवब्रूतवदात
किंविशिष्टंपथिकपांसुलंपांशुर्धूलिःतांलातिआदत्तेपांसु
लःपुच्छलःपथिकःश्वासौपांसुलश्चपथिकपांसुलस्तंकिं

॥ब्रूततंपथिकपांसुलंघनायूयमेवपथिविघ्नलंघनाः॥
॥अन्यदेशरतिरद्यमुच्यतांसाथवानवधूःकिमुच्यतां॥६॥

विशिष्टाःघनाःपथिश्रीघ्नंलंघनाःकिंवदतयथाहेपथिक।अ
न्यदेशरतिरद्यमुच्यतां।अन्यदेशरतिःअन्यदेशविलासकअ
द्यअस्मिन्वर्षासमयेप्रारब्धिमुच्यतांत्यजतां।अधुनाआगच्छति इ
तिचेत्तदासानवधूकिंउच्यतेकिंकथयतामित्यर्थः॥८॥ ॥

॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रति तावदन्योबुद्धिमान्जनः।हेनाथहेस्वामिन्।हंसपंक्तिरपिमान
संप्रस्थितामानससरोवरंलक्षिकृत्यकवियत्याकाङ्क्षोअन्यच्चचा
तकोपिदूषितोंबुयाचते।चातकोंबुवालकःसारंगोजळकोकिलः॥

र ॥हंसपंक्तिँपिमानसंप्रतिप्रस्थितावियतिमानसंप्रति॥
॥चातकोपिदूषितोंबुयाचतेदुःखितापथिकसाग्रियोच्यते॥ ९॥

याचतेभिक्षतेकिंअंबुसलिलंकिंभूतश्चातकः त्रषितःपिपासितः
सन्दुःखितापथिकसाग्रियोचतेहेपथिकपांथंग्रियाचतेतवाग्रि
यासादुःखितावर्त्ततेजनितविरहैत्यर्थः॥ ९॥ श्रीरामजयराम
ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलपुष्पमिति ॥ अतिभाति अतिशयेनशोभते। किंनीलकुसुमंनवत्रणं किंविशिष्टं कोमलंपेशलंसुकुमारंनकेवलंनीलंपुष्पंअतिभातिअपिच। विनाद्यते। कोसौशिखिवगणः मयूरसमूहः। कैः अंबुदैः। हेप्रियंअद्यअस्मिन्काले मयाविनातेतवकारतिः काप्रीतिः काप्रिया॥१०॥ ॥ मद्यवाद्यमिति॥

॥नीलपुष्पमतिभाति [illegible] कोमलंवारिविंदतिचचातकोमलं॥
॥ अंबुदैःशिखिवगणोविनाद्यतेकारतिःप्रियमयाविनाद्यते॥१०॥
॥ मेघशब्दमुदिताःकलापिनःशोषितात्हृदयशोकलापिनः॥
॥ दागमस्तशावसाद्यतेदुर्धरेणमदनेनसाद्यते॥११॥ ॥ ॥

यस्मिन्काले भवंति। केकलापिनः कलांपांतिचंद्रकांतिरक्षंतितानिकलापा निविद्यंतेयेषांतेकलापिनः शिखिनः। कीदृशाः शोषितागतभर्तृकातस्या हृदयंउरः तत्शोकलापितुंग्राहयितुंशीलंयेषांतेकलापिनः पुनः कीदृशाः। तेमेघाः कृतशब्दमुदिताः घनगर्जितहृष्टाः अपिच अवसाद्यते कास्यात्प्रिया कीदृशातोयदागमस्तशावर्षाकालदुर्बला अद्यवर्षाकालेनावसाद्यतेमदने

॥ किंविशिष्टं नवं पेशलं सुकुमारं केवलं नीलपुष्पं अति भाति अपि च ॥ विनाद्यते कोसौ शिखिवगणः मयूरसमूहः कैः अंबुदैः हे प्रियं अद्य अस्मिन्काले मया विना तेतव का रतिः का प्रीतिः का प्रिया ॥ १० ॥

॥ दुर्धरेणदुः सहेनत्यर्थं ॥ ॥ तथाविरहिणीस्त्रीणां ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंरूपापि॥ ॥ यथाहेमेघाः तंपथिकंयूयंब्रूतयतत्किंरूपापि
दयापिनास्तिनविद्यते। कयाकांतयायोषितयासह किंविशिष्ट
यापांडुगंउपतितालकांतयापांडुचतौग उंचपांडुगंडौतयोः
पतिताः अलकांताः यस्याकुटिलकेशांतायस्यासापांडुगंउप

॥किंरूपापितवनास्तिकांतयापांडुगंउपतितालकां॥
॥तया॥शोकसागरजलेयपातितांतद्गुणस्मरणमे॥
॥वपातितां॥१२॥

तितालकांतयाअन्यच्चतद्गुणस्मरणमेवपतितातांभ्यांजवो
पायइत्यर्थः॥ कीदृशांतांशोकसागरजलेअद्यवर्षासुपति
तांशोकस्यचलत्वात्सागरजलेनोपमा॥१२॥श्रीशिव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुसुमितेति॥ ॥ हे चनाः तंपथिकंप्रयमेवब्रूत। अस्मिन्वर्षाकाले
किमिति नसमवेक्षसे नागत्यसंभावयसि। कीदृशिमांदिनांरु
शां। केषुसमुत्सुकाननेषु। कीदृशेषुकुसुमितकुटजेषुकुसुमि
ताः कुटजाः येषुतानिकुसुमितकुटजानितेषुप्रावट्कालःप्र

॥कुसुमितकुटजेषुकाननेषुप्रियरहितेषुसमुत्सुकेषु॥ न
॥वहतिचकलुषेजलेनदीनांकिमितिचमांसमवेक्ष्यसेनदीनां॥१२॥

वर्त्ततइत्यर्थः॥ कीदृशेषुकाननेषुसमुत्सुकानिउत्कंठितान्प्रान नि ॥ धि ॥
नानिमुखानियेषुतानिसमुत्सुकानानितेषुनकेवलंत
थाविधेषुनदीनांजलेचवहतिकिंविशिष्टेकलुषेअप्रसन्नेनेदृशे सं
॥ काले॥१२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मार्गेष्वित्यादि ॥ ॥ हेसखिययाअहंजत्थांसजेहृदयंप्रियवियोग म०टी०
जत्थोकदाहंप्रियोवल्लभः तस्यवियोगोविरहः किंविशिष्टंगं
भीरमेघरसितव्यथिता। केषुसत्सुमार्गेषुचारणेषुपथिषुकथंभू
तेषुमेघसलिलेनविनासितेषुमेघानांसलिलंतेनअन्यच्च

॥ मार्गेषुचैवसलिलेनविनासितेषुकामोधनुस्पृ॥
॥तितेनविनासितेषुगंभीरमेघसरितव्यथिताक॥
॥दाहंजत्थांसखिप्रियवियोगजत्थोकदाहं॥१४॥॥

कामः कंदर्पः॥ कंदर्पोदर्पको नंगः कामःपंचशरःस्मरश्चमरः॥ धनु
स्पृशति। कथंविनातेनवल्लभेनविनाकिंविशिष्टं धनुः शिते
षुशिताः तीक्ष्णाः इषवोबाणाः यस्यतत्। एतेनकिमुक्तंवर्षाकालोबल
॥वान्कालः॥१५॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकुसुमेषु ॥ ॥यथास्मिन्वर्षाकाले वनानि प्रतिभा
निकेतकानां किंविशिष्टानां विराजितानां विशेषेण दृष्टिं प्रा
पितानां कैः नववारिकणैः नवं चततवारीच नववारितस्यकणाः
तैः नववारिकणैः अभिनवजलक्षीकरैः पुनरपिकिंदृशानांस्व
नद्भोधरवातवीजितानां अंभोजलंतद्धारयंतितेअंभोधराः
॥ नववारिकणैर्विराजितानांस्वनद्भोधरवातवीजि॥
॥ तानां॥मदनस्यकृतेनिकेतकानांप्रतिभांत्यश्ववनानि॥
॥केतकानां॥९५॥

स्वनंतश्चतेअंभोधराश्चस्वनद्भोधराः तेषांवातःसमीरःतेनवीजि ॥७॥
तानां चालितानांतेषांपुनरपि।किंविशिष्टानांनिकेतकानांयस्मणांकृते
कस्यमदनस्यवर्षाकालेकेतकीकुसुमानिसुगंधितानिभवंतितत्तः
॥कारणात्तत्रकामानिवसतीत्यर्थः॥९५॥तद्दिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेकामनिवासससर्जेति। भवंतयत्ससर्जस्रष्टवान्काःप्रजापतिः
स्रष्टृश्रेष्ठतरांतत्साधु शोभनंनिवसनंनिवासःआश्रयःकस्यका
मस्यनिवासःसचासौससर्जससर्जिनामवृक्षविशेषः। का
मनिवाससर्जकीदृशःप्रवरःप्रधानः। केषांमध्येवनौनां काभिः

॥ तत्साधुयच्चांसुतरांससर्जप्रजापतिःकामनिवाससर्ज॥
॥ लंमंजरीभिःप्रचरोवनानांनेत्रोत्सवोवासिसयोवनानां॥१६॥

कृत्वा प्रवरमंजरीभिःकुसुमितलताभिःनकेवलंमजरीभिः। प्रव
रोनेत्रोत्सवस्यउत्सवःश्वासिनेत्राणांउत्सवोनेत्रोत्सवःआनंदक
रस्त्वंभवसि। केषांसयोवनानांसहयौवनेनवर्त्ततइतिसयोवना:
तेषांसयौवनानां। सर्जकुसुमानितरूणांतेषांआनंदकरणानि भवंती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवकदंबेति॥ ॥हेनवकदंबतेतवाग्रिरसाप्रणतास्मीत्यर्थः। यतःकारणा
त्तेतवकुसुमस्मितंमंदनःकंदर्पःवसतिकुसुममेवास्मितंहसितंकुसुम
स्मितं। अन्यच्चकुटजकिंअवलम्ब्यतेकैःकुसुमैःयतःतेनिपति।तास्मिकथंभू
तस्यअतिदुःअसहस्यअतिशयेनदुखेअस्त्यतसःतथादुःसहस्यकुटज
तरौअत्रकोभिप्रायःकुटजःआद्यषिदुःअसहोभवति॥१७॥ ॥

॥नवकदंबशिरोवनितास्मितेवसतितेमदनःकुसुमस्मिते॥कुटज॥
॥किंकुसुमैरुपलास्यतेनिपतितास्म्यतिदुःअसहस्यते॥१७॥तरुम
॥वरविनतास्मितेसदाहंममहृदयंअकरोषिकिंसदाहं॥नवकुसुम॥
॥निरीक्षणेपदेहंविसृजेयंसहसेवनीपदेहं॥१८॥ ॥

तरुवरेति॥ ॥हेतरुवरकदंबतेतवसदासर्वदाविनतास्मिअहंएवंवि
ज्ञायते।ममहृदयंकिंदाहंकरोषियतस्त्वंकुसुमनिरीक्षणेअपदेहंअन्न
स्त्वावेदेहंवपुःइहविसृजेयंत्यजेहं।कथंसहसानितिइतेनकिमुक्त
भवतीयथा।वर्षाकालेबलवान्भवंतिनिपःकेवलंकुंदकदंबेदुःअसहो
॥अपरोपिनिपोप्रियारहितानांदुःअसहोभवति॥१९॥

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुसुमेरिति॥ ॥ भ्रमरो भंगध्वुंबति आस्वादयति कांयूथिकालतांच
साविशेषलता कीदृशं उपशोभिता कैः कुसुमैः पुष्पैः कीदृशैः शु
भ्रैः सितैः॥ पुनः कीदृशैः घनमुक्तांबुलवप्रकाशितैः घनेनमुक्तंप

॥ कुसुमैरुपशोभितांसितैर्घनमुक्तांबुलवप्रका ॥
॥ शितैः॥ मधुनः समवेक्ष्य कालतां भ्रमरध्वुंदति॥
॥ व्यूथिकालतां॥१९॥

रित्यक्तंचतत् अंबुस्रुतस्यलवः कणाः तैः प्रकाशितापितैः घन
मुक्तांबुलवप्रकाशितैः किंरूपा समवेक्ष्य दृष्ट्वा कांकालतां अव
सरकस्यवसंतस्यमधनः॥१९॥ श्रीरामचंद्राय नमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासामिति॥ ॥ लेखनाः तंपथिकंप्रयमेवब्रूत। यास्त्रियः सकु
त्सवप्रियतमैः सहमानयंतिभुंजंति। कस्मिन्काले मेघागमेकेषुदि
नेषुदिवसेषुसेंद्रायुधांबु धरगर्जितदुर्दिनेषुशक्रचापजलदस्तः

॥ तासांक्रतुःसफलएवहियादिनेषुसेंद्रायुधांबु धरगर्जित॥
॥ दुर्दिनेषु॥रकृत्सवंप्रियतमैः सहमानयंतिमेघागमेप्रिय॥
॥ सखिभ्यसमनयंति॥२०॥एवंनिशम्यविरहानलपीडिता॥
॥ यास्तस्यास्थितिंकखलुदयालुरपीडिताया॥सा ध्वेभिरे॥
॥ षमुदितेजलदैरमोघैः प्रत्याययौसदनमूनदिनैरमोघैः॥२१॥

नितिकिंविशिष्टंदिनेषुकथंहिस्फुटं नकेवलंअनयप्रियसखिभ्य
समानयंपूजयंतितुल्यः कुर्वंतितासांक्रतुःसफलः॥२०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ० रू० आदाय चेति॥ ॥येनपरेणकविना अहंयमकैःजीयेयतस्मैघट म० टी०
खर्परेणाहंउदकंवहेयंतस्यकिंकरोभवेयमित्यर्थः॥यत्सहजीयेय
तदामयैवाहंजियेयएताः प्रतिज्ञादृढिकरणार्थंशापतद्वयं अहंभा
वानुरक्तवनितारतैःशफेयंभावेनस्वभावेनचितेनपरमार्थेनानु

॥आदायचांबुत्तृषितःकरकोशापेयंभावानुरक्तवनितासु॥
॥रतैश्शफेयं॥जीयेययेनकविनायमकैःपरेणतस्मैवहेयमुदः॥
॥कंघटखर्परेण॥२३॥इतिघटखर्परकाव्यंसमाप्तं॥ ग्रं॥

रक्तारागयुक्तासाचासौवनितातस्याःसुरतानितैस्तानिनवानुयामि
त्यर्थः॥यदिप्रतिज्ञानपालयतित्यृषितःकरकोशापेयंहस्तपुटजल
गं अंबुतज्जलंचालभ्यग्राह्यशफेयंशपथं॥२३॥इतिसटिपनंघ
टखर्परारब्धंकाव्यंसमाप्तमस्तु॥ शुभंभवतु॥छ॥छ॥छ॥

KKSU LIBRARY
RAMTEK
441106
M-1617
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 10:50
,TRANSFERRED=2020/09/23 at 10:52:33
,PAGES=18
,TYPE=STD
,NAME=S0003661
,Book Name=M-1617-GHATKHAPRKAVYAM SATIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection